संस्कृत काव्यमन्दाकिनी

*

लेखकः

डॉ. परड्डी मल्लिकार्जुनः

*

प्रकाशकः

श्री गुरु अमरेश्वर प्रकाशनम्

श्री अमरेश्वरमठः गुलेदगुड्डु

१९९३

श्रीगुरु अमरेश्वर ग्रन्थमाला-सप्तदशं कुसुमम्

संस्कृत काव्यमन्दाकिनी

लेखकः

डॉ. परड्डी मल्लिकार्जुनः, एम्.ए., पिएच.डी.

साहित्यरत्नम्

कर्नाटक विश्वविद्यालय संस्कृतविभागः

धारवाड - 580 003

प्रकाशकः

श्रीगुरु अमरेश्वर प्रकाशनम्

श्री अमरेश्वरमठ गुलेदगुड्डु - 587 203

Sanskrita Kavya Mandakini,
A collection of Sanskrita Poems by
Dr. Paraddi Mallikarjun
Department of Sanskrit,
Karnatak University Dharwad - 580 003

Published by :
Sriguru Amareswara Prakasanam
Sri Amaresvaramatha, Guledagudda (Dist. Bijapur)
Karnataka State (India)

© Author

First Edition : May 1993
Copies : 500

Price : Rs. Fiften (15/—)

Printer :
K. E. Board's Printing Press,
Dharwad - 580 001

— प्रास्ताविकम् —

यदिच्छा मात्रसंभूतं जगदेतच्चराचरम् ।
संभृतं लीयते यस्मिन् शिवं वन्दे परात्परम् ॥ 1 ॥

काव्यं कविमनःप्रीतिं करोति प्रथमं यतः ।
स्वान्तः सुखकरं काव्यं कार्यमित्युच्यते ततः ॥ 2 ॥

कासुचित् पत्रिकासु प्रकाशं गताः
काव्यभागाः रसस्यन्दिनोऽलंकृताः ।
सज्जनानन्दहेतुर्भवन्तीति तान्
संकलय्याद्य तेषां पुनः स्थापयो ॥ 3 ॥

काव्यपुष्पाणि चित्राणि मे कानिचित्
हृल्लतामण्डनं यैः कृतं शंकर ।
सूत्रबद्धानि कृत्वानयै सादरं
स्वीकुरुष्व प्रभोऽहं कृतार्थोऽमरः ॥ 4 ॥

काव्यमन्दाकिनी ग्रन्थ-प्रकाशनविधौ नवे ।
यैः सहायं कृतं तैश्च सर्वैरुपकृतः कविः ॥ 5 ॥

श्रीमत्काशी ज्ञानसिंहासनाधीश्वर परमपूज्य श्री श्री श्री जगद्गुरु डा. चन्द्रशेखर शिवाचार्य महास्वामिना-माशीर्वचनम्

डॉ. परड्डी मल्लिकार्जुन विरचित संस्कृत काव्यमन्दाकिनी अस्माभिरवलोकितामूलाग्रं, येनास्मच्चित्रमानन्दतुन्दिलं भवति। काव्यसंग्रहेऽस्मिन् कति कविताः विडम्बनपरा बोधपराश्च सन्ति। कति देशभक्तिश्रमगौरवादिगम्भीरविषयप्रतिपादका भवन्ति। कतिच महापुरुषगुणप्रशंस पूर्णा भवन्ति। सर्वासु कवितास्वेतासु कविप्रतिभा स्फुटं व्यक्तीभवतीति शक्यते वक्तुम्।

कविवाणी सरला सरसा मन्दाकिनीव विमला च दृश्यते मनश्च सहृदयानावर्जयति। नैककाव्यग्रन्थरचनया सुरवाणी सेवा कवितानेन सम्यक् कृता। अनयैव सरण्या देववाणीसेवा निरन्तरं निरातंकंच भवतु, येन सारस्वतलोकोऽयं दृढमुपकृतो भवतु। तदर्थेच काशी विश्वनाथः माताऽन्नपूर्णेश्वरी जगद्गुरु विश्वाराध्यश्चैनंमायुरारोग्य भाव्येन योजयत्वित्याशास्महे। शिवं भूयात्।

समर्पिता

तेभ्यो गुरुभ्यो यदनुग्रहान्मे
भाषाप्रभुत्वं सरलं सुसाध्यम् ।

कविना
परडी मल्लिकार्जुनेन ।

अनुक्रमणिका

1	राष्ट्रवन्दनम्	1
2	भारती भाति भूतले	4
3	मानवधर्मः	6
4	मावमस्थाः सखे !	8
5	सकृद्वा यो हरिं स्मरेत्	10
6	निगता कविता कवेः	14
7	स एव सज्जनः	16
8	वाराणसीपुरपतिः कुरुतेऽट्टहासम्	17
9	रसिकता सिकता भुवनेऽधुना	19
10	धन्यः स एव शिक्षकः	22
11	वयं धर्मधुरन्धराः	24
12	दूरतः पर्वताः रम्याः	26
13	नरकः केन गम्यते	28
14	मातृवात्सल्यसागरः	31
15	ज्ञानदेवालयः	33
16	रमणस्तवमालिका	36
17	अन्नदानीश्वरस्तवः	38
18	कुमारयोगिसंस्तवः	41
19	हा हन्त विद्वान् स्वयशोऽवशेषः	43
20	विरलो मनीषी	45
21	मल्लिकार्जुनयशः सुरभिः	47
22	महान्तेशसुप्रभातम्	50
23	रङ्गोकुलदेवता	56
24	रेणुकस्तवमञ्जरी	58

१ राष्ट्रवन्दनम्

हिन्दवः क्रिश्चियन् मुसलमान् बन्धवः
सन्ततं सोदरत्वेन ये सङ्गताः ।
श्रद्धया वन्दनं यस्य ते कुर्वते
दृश्यतामस्मदीयं महद् भारतम् ॥ १ ॥

कालिदासादिभिर्यत्तु संकीर्तितं
स्वीयकाव्येषु भूलोकसंचारिषु ।
व्यासवाल्मीकिसद्ग्रन्थसंमानितं
राष्ट्रमस्माकमन्यादृशं भारतम् ॥ २ ॥

आगताः दूरतो येऽपि दुष्टाशया
निर्गता राक्षसास्तैर्न वासः कृतः ।
येऽपि वाऽत्र स्थिता भारतीया कृताः
अस्मदीयं महासंस्कृतं भारतम् ॥ ३ ॥

गंगयानङ्गशत्रोर्जटामालय
यत्स्थली पावनेनाम्भसा पाविता ।
तृङ्ग्भद्रादिभिः सस्यपूर्णा कृता
वीर्यवन्नाकमेवागतं भारतम् ॥ ४ ॥

शंकराचार्य-मध्वादिवेदान्तिनो
बुद्धमुख्या जगन्मोददाने रताः ।
वीरशैवादयो यद्यशोगायका
नीतिधर्मप्रसिद्धं क्षितौ भारतम् ॥ ५ ॥

प्राकृतं बङ्गला, कन्नडं हिन्दवी,
मागधी कोंकणीत्यादिभाषामयम् ।
किन्तु तासां भवेन्मातृवत्संस्कृतं
तत्सुसंस्कारयुक्तं भवेद् भारतम् ॥ ६ ॥

वर्गतो वेषतो भाषयाहारतो
राष्ट्रमित्थं भवेत् भेदपूर्णं यदा ।
मूलतो भारतीया वयं सत्प्रजाः
एकता भिन्नतायां सदा भारते ॥ ७ ॥

राष्ट्रभंगोद्यमे दत्तचित्तो जन
आततायी च साफल्यवान् किं भवेत् ।
शान्तिमन्त्राप्तसौख्या वयं भूतले
विश्वकल्याणचित्तं सदा भारतम् ॥ ८ ॥

अर्थशास्त्रं तथा नाट्यशास्त्रं पुनः
कामशास्त्रं तथा वैद्यकं विश्रुतम् ।
सर्वशास्त्राणि पुष्टाणि यत्राभवन्
प्रज्ञया विश्वसंमानितं भारतम् ॥ ९ ॥

वित्तहीना नरा यत्र सत्यान्विताः
वित्तपूर्णा जना स्त्यागशीलान्विताः ।
हिंसनं यत्र सर्वैर्जनैः खण्डितं
शान्त्यहिंसामयं सन्ततं भारतम् ॥ १० ॥

२ भारती भाति भूतले

तुष्टा यदैव जनता जनतापहारि-
भाषां सुसंस्कृतकरीं विगतां विलोक्य ।
नूनं तदा भवति मे हृदयं विदीर्णं
को वा सहेत जननीं जननिन्दितां स्वाम् ॥ १ ॥

त्यक्त्वा विदेशजनतापरिपूजितां तां
मातामहीं सकलदेशगिरां पवित्राम् ।
काचं विलोक्य चकितो मणिनाप्यतुष्टः
शेते सुखं विगतवैभवदीनचेताः ॥ २ ॥

यावन्ति सन्ति हि वचांसि जगत्तलेऽस्मिन्
तेषामुदारजननी जननिर्मलोक्तिः ।
भ्रान्तो भवेत्सरससुन्दरभारतीं तां
सालंकृतिं बहुगुणां विगणय्य मूढः ॥ ३ ॥

स्वीयां गिरं कलयितुं कलहंसगीतां
वाण्यमृतं पिबतु भारतदेशवासी ।
हीनः कथं विमलयात्मदृशा मनुष्यः
द्रष्टुं क्षमो भवति वस्तुचयं प्रपञ्चे ॥ ४ ॥

काव्यामृतेन जनतामतितापहारि
शास्त्रेण भेषजसमेन गदापहारि ।
वेदागमैः शुचिजलैर्मनसोऽघहारि
हार्येव संस्कृतवचः कुमतिप्रहारि ॥ ५ ॥

भूङ्क्तेऽशनं जगति यो मनुजोऽनिवेद्य
श्रीशम्भवे च विमदाय भवाय कश्चित् ।
स्तेनो भवेत्पशुरय सुरभारतीं यो
विस्मृत्य लोकजननीमपि हृषमेति ॥ ६ ॥

श्रीपाणिनीयरचनाकृतशुद्धिरेषा
या संस्कृता विमलसूरिगणेन भाति ।
लोके सदैव सरसा विरसेऽपि भाषा
स्वर्णं यथा निकषघर्षणतश्चकास्ति ॥ ७ ॥

सन्मार्गदर्शनरता जननीव पुण्या
विद्वज्जनैरनुदिनं सकलैः सुमान्या ।
सा भारती यदि भवेदधुना विमान्या
तद्भारतीयजनता कथमस्तु धन्या ॥ ८ ॥

३ मानवधर्मः

कायिकं हिंसनं वाचिकं हिंसनं
सर्वदा निन्दितं मानसं हिंसनम् ।
प्राणिहिंसारतिर्नारकी दुःस्थितिः
पापयोनौ पुनः पातयेद् दुर्मतिम् ॥ १ ॥

सत्यनाग् यो नरो देवतुल्यो भुवि
मोदते मुक्तदेहः सदा वा दिवि ।
तद्यशो गीयते सर्वलोकैर्यदा
मृत्युमप्येत्य जीवेन् मनुष्यः सदा ॥ २ ॥

यस्य वा कस्य वा संपदं लौकिकीं
वीक्ष्य तत्स्तेयबुद्धिर्नरो नो भवेत् ।
शम्भुना यद् धनं दीयतेऽलौकिकं
तच्छिवायार्पयित्वा नरैर्भुज्यताम् ॥ ३ ॥

भूतसौख्ये रतिर्देहभावे मितिः
आत्मलाभे मतिः शम्भुपादे नतिः ।
सज्जनानां नुतिः दुष्टबुद्धिक्षतिः
सर्वमेतन्न यस्यास्ति तद् दुर्मतिः ॥ ४ ॥

ब्रह्मचर्यं नरैर्देहिकं मानसं
स्वीयभार्यारताद्वा सदा पाल्यताम् ।
शम्भुपादद्वय - ध्यान - पूजादिकं
प्राणिवर्गे दया दानलौके क्षमा ॥ ५ ॥

वेद - वेदान्तवाक्यैः सदा घोषितं
धार्मिकैर्दर्शनाढ्यैः पुनः पोषितम् ।
लौकिकः पारमार्थः समं ज्ञायतां
एष धर्मः सदा मानवैः सेव्यताम् ॥ ६ ॥

४ मावमंस्थाः सखे !

ताज् महल भव्यतादिव्यतालोकने
हर्षपूर्ण भवेत्ते तावकं मानसम् ।
किन्तु तन्निर्मितेर्मूलहेतुं कथं
न स्मरस्यद्य तं दैन्यपूर्णं जनम् ? ॥ १ ॥

गायने नर्तने काव्यबन्धे रताः
साक्षराः लब्धमानाः समाजे यतः ।
किन्तु तेषां कलावर्धके साधन
राक्षसास्ते कथं मानवे निर्धने ? ॥ २ ॥

शिक्षकाश्छात्रवर्गोपदेशे रता
धार्मिका वीतचिन्ताः समाजे यतः ।
वैद्यवृन्दोऽपि यत् स्वीयकार्ये रतः
दीनचित्तं स्मरस्यन्नदाने रतम् ? ॥ ३ ॥

आङ्ग्लराज्ये पराधीनतादुःखिताः
भारतीयाः सदा शृङ्खलायन्त्रिताः ।
यैर्महादेशभक्तैर्वयं तारिताः
जर्जरान् संस्मरस्यद्य तान् वा मृतान् ॥ ४ ॥

हर्म्यवासी जनोऽमूल्यवस्त्रान्वितो
मिष्टभोगी सदा वैद्यसम्मानितः ।
वृक्षमूलाश्रयं जीर्णवस्त्रान्वितं
खाद्यहीनं क्षणं संस्मरेत् शोषितम् ॥ ५ ॥

उन्मुखीभूयते स्वाक्षि वोन्मील्यते
येन भूमौ लुठन् ना कथं दृश्यते ।
बान्धवो भारते हन्त जातः सखे
किं त्वयोपेक्ष्यते दैन्यपूर्णो जनः ? ॥ ६ ॥

यत्तरोर्वा लतायाः शिरोभूषणं
पुष्पवृन्दं सदा द्रष्टुकामो नरः ।
पादपानामिदं यैः कृतं पोषणं
तानि पश्येत्तु मूलानि नम्राननः ॥ ७ ॥

५ "सकृद्वा यो हरिं स्मरेत्"

अथैकदा भक्तधुरीणभूतं
जिज्ञासमानो दिवि देवदेवम् ।
स नारदो भक्तगणाग्रयायी
पप्रच्छ विष्णुं विनयप्रसन्नम् ॥ १ ॥

भवान् हि वेत्त्यद्य पुमान् जगत्यां
को वा भवेन्निर्जितभक्तवृन्दः ।
ममैतदेवास्ति कुतूहलं प्रभो !
यस्ते भवेत्प्रेमपदं मुरारे ! ॥ २ ॥

कृतस्मितो भक्तगणार्चितो हरि
र्जानन्महर्षेः हृदये स्थितं यत् ।
स दर्शयामास विशालभूमौ कृषीवलं
क्लेशयुतं विनीतम् ॥ ३ ॥

कुवाससं दीनमुखं निरीक्ष्य
सकौतुकं देवमुनिर्हि मान्यः ।
निरक्षरं मुग्धमतिं श्रमार्त्तं
हरेरभिप्रायमचिन्तयन् सः ॥ ४ ॥

ततः प्रभाते मुनिरात्मनिष्ठः
परीक्षितुं दीनकृषीवलं तम् ।
सायन्तने स्वीयगृहं प्रयान्तं
तमन्वगच्छत्कृषकं मुनीन्द्रः ॥ ५ ॥

पूर्वं प्रवेशात्कृषको गृहस्थः
विष्णुस्मृतिं भक्तियुतोऽकरोत्सः ।
दारादिभिः सार्धमथाऽनुभूय
स्वाहारभागं शयनोत्सुकोऽभूत् ॥ ६ ॥

एकवारं पुनर्विष्णु-
स्मरणे दत्तमानसः ।
शयनादुत्थितो भूय-
श्चैकवारं कृषीवलः ॥ ७ ॥

इत्थं त्रिधा देवमनुस्मरन् स
कथं भवेद् भक्तगणाग्रयायी ।
वैकुण्ठमागत्य हृदि स्थितं तन्-
न्यवेदयद् विष्णुनुतिं हि कुर्वन् ॥ ८ ॥

स्मेराननो देवमुनिं सः देवः
प्रोवाच वाचाऽमृतपूर्णया तम् ।
गृहाण पात्रं निजपाणिनेदं
तैलेन पूर्णं निमृतं भ्रम त्वम् ॥ ९ ॥

एकोऽपि दिन्दुर्न पतेत्कदाचित्
तैलस्य पात्रादवधारयैतत् ।
चचाल हस्ते घृततैलपात्रः
प्रदक्षिणे दत्तमतिर्हि भूमेः ॥ १० ॥

आगतो घृतपात्रः सन् कृत्वा विश्वप्रदक्षिणम् ।
मुनीन्द्रस्तोषमापन्नस्तैलबिन्दोरपाततः ॥ ११ ॥

पप्रच्छ देवो दिविजातमान्यं
'मुने! कियद्वारमनुस्मृतोऽहम्' ।
सतर्कमूचे मुदितो मुनीन्द्रः-
भवत्क्रियादत्तमतिः कथं हि ॥ १२ ॥

अनुस्मराम्यद्य भवन्तमीश !
द्वयं कथं कर्त्तुमहं समर्थः ।
हरिस्तदा प्राह—कृषीवलोऽपि—
ममैव कार्यं कुरुतेऽतिशान्तः ॥ १३ ॥

क्षेत्रे कृषिं पुत्रगणस्य रक्षा-
मातिथ्यमभ्यागतबान्धवानाम् ।
भार्यारतिं श्रान्ततनुर्हि कुर्वन्
नित्यं त्रिधा मत्स्मरणं करोति ॥ १४ ॥

त्वमेकपात्रेऽभिहितप्रयत्नः
न नीतवान् मां स्मृतिमप्रयत्नः ।
त्वमेव तावत्परिचिन्तयस्व
कृषीवलो भक्ततमः कथं मे ॥ १५ ॥

गतमोहो परित्यक्तभक्तिगर्वो मुनिस्तदा ।
विनीतो धन्यतामेत्य मनस्येवमचिन्तयत् ॥ १६ ॥

स्वीयकर्मण्यतो रक्तः
शिवे च कुटिलेतरे ।
भक्तानामग्रणीः स स्यात्
सकृद् वा यो हरिं स्मरेत् ॥ १७ ॥

६ निर्गता कविता कवेः

पत्रेस्वन्तर्भवति हि मधौ यो रसालस्य पक्षी
कृष्णः कूजत्यतिमधुरया स्वेच्छया हन्त वाण्या ।
श्रुत्वा यद्यत् सहृदयजनस्याश्रुवर्षातिहर्षात्
तेनैवेयं भवति कविना निर्मिता सूक्तिरेका ॥ १ ॥

कृत्वा सद्यो विधिनियमितं नित्यकर्मांशुमाली
चास्तं यावद् व्रजति सहसा स्वीयविश्रामहेतोः ।
वत्सोऽदृष्ट्वा भवति विकलो मातरं धेनुरूपां
दृष्ट्वा सद्यो विमलमतिना निर्मिता निर्मलोक्तिः ॥ २ ॥

हंसो मन्दं व्रजति विमलं साम्बुजे वारिजाले
कुर्वन् हर्षात् कलकलरवं स्वीयभार्यासहायः ।
निश्चिन्तः सन् नृपतिवदयं राजतेऽनल्पगर्वः
तं दृष्ट्वेयं रसिक ! रचिता सूक्तिरन्या सुमान्या ॥ ३ ॥

सन्तुष्टो यो नभसि जलदान् वीक्ष्य हर्षातिरेकात्
नृत्यन् गायन् विहसति मुदा चिन्तितान् तानतृप्तान् ।
चित्रान् बर्हान् वहति शिखिनां भूमिपालः सगर्वः
वीक्ष्येमं तं सजलनयनात् निर्गता सूक्तिरेका ॥ ४ ॥

सद्योजातां वहति समुदं दन्तपङ्क्तिं सहासं
दृष्ट्वा चन्द्रं गगनतिलकं प्राप्तुकामः प्रकामम् ।
तस्याप्राप्तौ नयनयुगलात् संकिरेद् यस्तु मुक्ताः
ईशावास्या सरसकविता निर्मिता वीक्ष्य बालम् ॥ ५ ॥

नद्यास्तीरे चरंत सहसा वीतरागो हि लोकात्
वीचीगानं श्रुतिपथमिदं मञ्जुलं याति यावत् ।
तावत् श्रुत्वा सहजसुभग यः कविः वीतचिन्तः
तेनैवास्मच्छ्रवणसुभगा निर्मिता सूक्तिरेका ॥ ६ ॥

सायंकाले विमलमनसा याति देवालयं तं
पूजा शम्भोः सकलशुभदा या भवेत् तत्र रम्या ।
तावद् घण्टासुमधुररव यः श्रृणोत्यात्मतृप्तः
तेनैवैका सुजनसुखदा निर्मिता पद्यसूक्तिः ॥ ७ ॥

स्त्रीरत्नं वा कुशलमतिना निर्मितं यद्विधात्रा
सौन्दर्यस्य प्रतिनिधिमिव स्वर्गलोकैकलभ्यम् ।
हावैर्भावैर्जगति पुरुषाकर्षणं यत् करोति
दृष्ट्वा ह्येतत् सरसमनसा निर्मिता पद्यमाला ॥ ८ ॥



७ स एव सज्जनः

वित्तमस्ति यदा सुसंस्कृतवाङ्मनोहृदयं सदा
नीतिधर्मरतिः पुनर्ननु पात्रदः खलु सज्जनः।
शक्तिरस्ति यदा तु निर्बलरक्षणे दृढदीक्षितो
दुष्टशिक्षणशिष्टरक्षणमानसो यदि सज्जनः ॥ १ ॥

साक्षरो यदि पूर्वपुण्यविशेषतो जगतीतले
राक्षसो यदि नैव दीनजने च संप्रति सज्जनः।
कार्मिकं कृषकं च दीनजनं कुवस्त्रमयं सदा
वीक्ष्य वाक्षिनिमीलनं कुरुते न यः सतु सज्जनः ॥ २ ॥

भुज्यते मधुरान्नमेव नरेण येन सदा मुदा
भिक्षुकं प्रति नेतिभाषणतत्परो न स सज्जनः।
वैद्यके निरतोऽपि रोगगणैश्च बाधितमानवे
रक्षको यमसोदरो भविता न यः स तु सज्जनः ॥ ३ ॥

रक्षकोपि भटश्च हिंसनतत्परो न भवेद् यदा
दण्ड्यदण्डनमानसो विनयान्वितः स तु सज्जनः।
यो न वा जनतोपकारविचारतत्परमानसो
नैव दुर्बलघातको यदि भूतलेऽद्य हि सज्जनः ॥ ४ ॥

८ वाराणसीपुरपतिः कुरुतेऽट्टहासम्

सञ्जीवयेत् परिचितांमनुसन्ततिं या
सेयं म्रियेत बहुधा समुपेक्षिता चेत् ।
इत्थं विचिन्त्य शतशोऽप्यनुधावतोऽस्मान्
वाराणसीपुरपतिर्मुदितो विलोक्य ॥ १ ॥

नानाविदेशसमुपागतपण्डितांस्तान्
राजोपचारसहितान् मुदितांश्च वीक्ष्य ।
दोनैकबन्धुरधुना ह्यनिमेषनेत्रो
वाराणसीपुरपतिः समभूद् विलक्षः ॥ २ ॥

तप्तुं तपःस्थलमिदं समुपागता ये
गङ्गातरङ्गजलधौतपवित्रताङ्गा ।
तान्धावतोऽप्यशनजातविलोभलोलान्
वाराणसीपुरपतिर्भवति स्मितास्यः ॥ ३ ॥

या भारती जनहिताय पुरावतीर्णा
स्वर्लोकतो भरतखण्डमखण्डपुण्यम् ।
तामद्य बोधयति यद्धि विदेशिवृन्दः
वाराणसीपुरपतिर्ह्यनुकम्पतेऽस्मान् ॥ ४ ॥

चर्चा कृता भवति संसदि पण्डितानां
नो देववाक् कथमियं भदतु स्थिरेति ।
तान् जीविकाच्युतिभयाद् विकलान् विलोक्य
वाराणसीपुरपतिः कुरुतेऽट्टहासम् ॥ ५ ॥

९ रसिकता सिकता भुवनेऽधुना

असत्यस्याभिधानाद्वा काव्यं तन्नोपदिश्यताम् ।
असभ्यार्थाभिधानाद्वा हृसदर्थाभिधानतः ॥ १ ॥

प्राचीन एव समये कविकर्मनिन्दा
युक्तित्रयेण घृणया विदुषा कृतैवम् ।
सभ्येतरं तदपि नीतिविरुद्धमेव
सह्यं भवेदवितथं यदि काव्यवस्तु ॥ २ ॥

प्रत्यक्षरप्रणयिनो ददतः सुवर्ण-
लक्षं कवेरनुपदं रसिकस्य यस्य ।
औदार्यकीर्तिलतिका लसति प्रफुल्ला
क्वास्ते नृपोऽद्य जगतीतलकल्पवृक्षः ॥ ३ ॥

क्षुद्रोऽपि सन्नरपतिः पुरुषोत्तमादि-
देवैः समीक्रियत इत्यवलोकितव्यम् ।
कर्णायते स्म कविषु स्तुतितुष्टचेताः
तादृङ्नरो जडमतिर्भवितास्तु किम् ॥ ४ ॥

तां वा शिरीषसुमकोमलगात्रयष्टिं
स्तुन्वन्ति कोमलधियः कवयोऽबलेति ।
सैवाधुना पुरुषवञ्चनरुष्टचित्ता
स्वीयं बलं बहुतरं प्रकटीकरोति ॥ ५ ॥

काव्योपदिष्टरमणीं यदि लब्धुकामो
यत्नं करोति बहुधा वसुधातलेऽस्मिन् ।
व्यर्थश्रमैर्भवति खिन्नमनाः मनुष्यः
काव्ये हि केवलमियं रमणी गुणाढ्या ॥ ६ ॥

सीता समं स्वपतिना हृतराजभोगा
याता सुकोमलवपुर्विपिनं धनं तत् ।
संपत्सु राजभवने मृदुभाषिणी या
निन्दापरा भवति भर्तरि वीतवित्ते ॥ ७ ॥

काचित्सती यमपुरीं प्रति नीयमानं
भर्तारमात्मबलतोऽलभतेति चित्रम् ।
सत्या हि पीडिततनुं प्रसभं सुकान्तं
त्राता यमः सकरुणं मरणैकमित्रम् ॥ ८ ॥

सत्यं वदन् नरपतिर्दयितां च पुत्रं
विक्रीय रक्षणपरो ह्यवसत् श्मशाने ।
एतद्विचार्य चतुरा मनुजैकबन्धु-
मिथ्याभिधाननिरता भवने वसन्ति ॥ ९ ॥

पीत्वा जलं जलमुचां विमलं सतृष्णः
पक्षी स जीवति कथं कविकीर्तिपात्रम् ।
जीवेत् कथं स किरणैः शशिनः पतत्त्री
अज्ञानजं कविगणैरुदितं हि सर्वम् ॥ १० ॥

स्फीतैर्यशोभिरखिला भुवनत्रयीयं
शुक्लत्वमेति सरसेति विचारहीनम् ।
एवंविधैः सुमधुरैर्वचनैः प्रतार्य
संपाद्यते कविवरैर्विपुला हि संपत् ॥ ११ ॥

कवितया यदि जीवितुमीहसे
भवसि निर्धनिको जननिन्दितः ।
कवय जीविकया सह चान्यया
रसिकता सिकता भुवनेऽधुना ॥ १२ ॥



१० 'धन्यः स एव शिक्षकः'

'तिष्ठामि दर्गेऽद्य न वेति' छात्रो
भवेत्स दोलायितचित्तवृत्तिः ।
यस्मिन् पुराणेन पथा गुरौ चेद्
अध्यापनव्यग्रमतौ, स धन्यः ॥ १ ॥

सुवाससा लेपनकर्मणा वा
जनप्रियो यो निजछात्रमध्ये ।
कृपालुतामस्य समीक्ष्य छात्रे
स्मरामि कृष्णस्य धनञ्जये ताम् ॥ २ ॥

परीक्षकोऽहं भवतां हि मान्यो
न कोऽपि हेतुर्भवतां भयस्य ।
यस्येदमाकर्ण्य वचस्तु छात्राः
स्वाध्यायचिन्ताविमुखा भवन्ति ॥ ३ ॥

विद्यालयेऽध्यापनकार्यमग्ने
विद्या-लवप्राप्तिमुपेक्ष्य छात्राः ।
यस्मिन् कृपातोयनिधौ बुधेऽद्य
भवन्ति चिन्तारहिताः, स धन्यः ॥ ४ ॥

श्रीकालिदासोक्तरघूत्तमाना-
मादर्शमेकं परिपालयन्यः ।
स ब्रह्मचर्याप्तविशिष्टविद्यः
सुखेच्छुरभ्यासविरामधन्यः ॥ ५ ॥

उत्तीर्णताश्वासनजातहर्षः
छात्रोऽपि पाठ्येतरकर्मलीनः ।
स्ववेतनं प्राप्य विना श्रमेण,
योऽध्यापको हर्षभरः, स धन्यः ॥ ६ ॥

११ वयं धर्मधुरन्धराः

धार्मिकाश्च वयं सर्वे यतो दीनजनान् प्रति।
शुचिर्भूता अधौताङ्गान् कुर्मश्चाक्षिनिमीलनम् ॥
(दृश्यं नामङ्गलं यतः।) ॥ १ ॥

श्रुत्वा तद्दीनमाक्रन्दं भिक्षार्थं धावतां नृणाम्।
कर्णौ पिधाय गच्छामः श्रव्यं नामङ्गलं यतः ॥ २ ॥

लुठतः करुणाक्रन्दैः भूतले वीक्ष्य तान् नरान्
नास्माकं पाटवं वाण्यां वाच्यं नामङ्गल यतः ॥ ३ ॥

स्पृशामो बन्धुसन्दोहं श्वगणं लालने रताः।
न पुनर्मनुजवृन्दं तत् धार्मिकाः प्रथमे वयम् ॥ ४ ॥

मृत्सर्पोपासने रक्ताः जीवत्सर्पगणं पुनः।
वीक्ष्य हन्तुं प्रवृत्ता हि अहिंसाव्रतधारिणः ॥ ५ ॥

धार्मिकाचारपूतानां चहापानादिवर्जनम्।
रहस्येव भवेल्लभ्यं मद्यं तद् बहुवल्लभम् ॥ ६ ॥

उपेक्षा परवित्तेषु येषां भवति सात्त्विकी।
त एव लाटरीसक्ताः वयं धर्मधुरन्धराः ॥ ७ ॥

यानेव मन्यते लोकः परदारसहोदरान् ।
तैरेव वारनारीणां दास्यं रहसि स्वीकृतम् ॥ ८ ॥

वंचनं पापमित्याहुर्ये पुनर्भाषणे रताः ।
सामाजिकथने सक्तिरस्माकं तु विरागिणाम् ॥ ९ ॥

कुर्वन्तः स्वर्गमोक्षादिकथां कथनकौशलाः ।
भोगान् भूलोकसंबद्धान् लब्ध्वा धन्या वयं यतः ॥ १० ॥

१२ दूरतः पर्वताः रम्याः

कविः प्रसिद्धो जगतीतलेऽस्मिन्
स पण्डितो वादजितारिवर्गः ।
स चित्रकारो जितलोकचित्तः
स नाट्यवृत्तिर्भुवि कीर्त्तिपात्रम् ॥ १ ॥

कृतौ पुनर्दीनजनेतिवृत्तात्
हृतं मनः पाठकबान्धवानाम् ।
स्वजीवने जीवनवृत्तिहीनान्
तिरस्करोत्येव कविः प्रमोदात् ॥ २ ॥

'सत्यं वदे' त्यादि विवादकाले
उदाहरन् सूक्तिगणैः सुमान्यः ।
असत्य-हिंसादिरतः स्ववृत्तौ
स पण्डितः पण्डितवृन्दमौलिः ॥ ३ ॥

निसर्ग-सौन्दर्यविलोकतत्परः
स्वचित्रजातेन विमुग्धचित्तः ।
विवस्त्रलावण्यवती-सु (कु) चित्रैः,
धनार्जने दत्तमतिः कलाकृत् ॥ ४ ॥

रामादिवेषैः हृतलोकचित्तः,
नाट्ये पुनर्लब्धयशाः सुवासाः ।
रामारतिर्मद्यरुचिर्विलज्जो
लोकेऽतिलोभी नटराज एषः ॥ ५ ॥

१३ नरकः केन गम्यते

लौकिकं पारमार्थार्धमन्ये जनाः
येन धर्मोपजीवेन संत्याजिता ।
स्वर्गतुल्यं तदेव स्वयं भुज्यते
प्रेत्य स स्वर्गगामी भवेदर्चकः ॥ १ ॥

क्षेत्रपाला श्रमाद् दैन्दपूर्णाः सदा
कार्मिकाद्याः क्षुधापीडिताः सर्वतः ।
ये सदोपेक्षिताः सभ्यता गर्वितैः
ते पुनः स्वर्गवासाधिकारोचिताः ॥ २ ॥

शिष्यवित्तापहारः सदापेक्षितः
येन हृत्तापहारः सदोपेक्षितः ।
दुर्विनीताश्च छात्राः समाजे यतः
स्वर्गगामी भवेच्छिक्षको दक्षिणः ॥ ३ ॥

येन निर्वाचनात्प्राक् प्रजाः पायिता
रामराज्यादिनिर्माणवाक्यामृतम् ।
शासकीभूय तेनैव लंकेश्वर
शासनात् ताडिताः स्वर्गकामो भवेत् ॥ ४ ॥

वंचनं धर्म इत्येव यैर्मन्यते
लौकिकं नाककल्पं पुनर्भुज्यते ।
ते वणिग्राक्षसाः मिश्रणे दीक्षिताः
स्वर्गवासेच्छुकास्तेऽपि चेद् रक्षिताः ॥ ५ ॥

येऽपि वाक्कीलवृत्तौ पवीणा नराः
शिष्टरक्षाधिकारे यतो दीक्षिताः ।
दुष्टरक्षासमर्था विवादोत्सुका
तेऽपि वांछन्ति चेत्स्वर्गसौख्यं परम् ॥ ६ ॥

रक्षिणः सत्प्रजापालने दीक्षिताः
भक्षकाः वित्तचिन्ताकुलाः व्याकुलाः ।
दुष्टमैत्रीयुताः शिष्टशिक्षारताः
किंकरास्ते यमस्यापि नाकोत्सुकाः ॥ ७ ॥

यैर्यमस्याग्रजैर्वित्तचिन्ताकुलै
रोगिवृन्दासुभिः सर्वदा क्रीडितम् ।
देवतुल्यापि वृत्तिः कुमार्गे रतैः
दूषितातेऽपि गच्छन्ति नाकं हि तम् ॥ ८ ॥

वास्तुविद्याप्रवीणाः धनव्याकुलाः
सर्वदा सेतुबन्धादिकार्येरताः ।
लब्धमानाः समाजे प्रजाद्रोहिणः
तेऽपि स्वर्गोत्सुकाः निस्त्रपास्चेत् सदा ॥ ९ ॥

एतेऽपि यदि वांछन्ति सर्वे स्वर्गं सदासुखम् ।
शून्यगर्भो महाघोरो नरकः केन गम्यते ॥ १० ॥

१४ मातृवात्सल्यसागरः

सद्गुरोः यां कृपां प्राप्रवान् शैशवे
श्रीमहान्ताभिधो मद्गुरुः साधकः ।
लोकपूज्यस्तथा भोगदूरोऽभयः
शम्भुपादार्चको जङ्गमाराधकः ॥ १ ॥

सेवयाचार्यावर्यस्य मृत्युंजया-
ख्यस्य शंभोर्द्वितीयस्य यः पावितः ।
ब्रह्मचर्यादि संपत्समालिङ्गतो
येन भूमण्डले लोकसंभावितः ॥ २ ॥

यस्य माता पिता बन्धुवर्गो ऽपरः
सद्गुरुः सर्वदाभूत्स मृत्युंजयः ।
पुत्रवत् पालितो रत्नवत्संस्कृतः
तेजसा येन भूमौ सदा भासुरः ॥ ३ ॥

यः समाजोन्नतिं सर्वदा कांक्षते
चिन्तितोऽहर्निशं कार्यमग्नो यतः ।
नीतिसंपद्भरं माववं वा नवं
कर्तुकामः सदा यत्नशीलस्ततः ॥ ४ ॥

दीनवालाः प्रसादात्सदा पाविताः
नीतिधर्मोज्वला पापसंक्षालिताः ।
सर्वभूतेषु तस्यातुला या दया
मातृवात्सल्यरत्नाकरोऽभूत् तया ॥ ५ ॥

मुरुघेन्द्रकृपापात्रं मृत्युंजयमिवापरम्
महान्तस्वामिनं वन्दे मातृवात्सल्यसागरम् ॥ ६ ॥

यः सेवया च वयसा निजकर्मणा च
वार्धक्यभागपि मनागपि योऽ विरामः ।
लोकोपकारजितकल्पतरुः प्रसन्नः
पश्येत् शतं हि शरदां शरदिन्दुकान्तिः ॥ ७ ॥

१५ ज्ञानदेवालयः

चर्मचक्षुष्मतो ज्ञाननेत्रान्धता
लौकिकी दुस्थितिर्भूतले दृश्यताम् ।
सर्वगामी शिवश्चान्तरङ्गे स्थितः
द्रष्टुकामाय तं वांछितेहान्धता ॥ १ ॥

शारदामातुरेकं स्तनं वाङ्मयं
तद् द्वितीयं पुनर्गानविद्यामयम् ।
तत्स्तनाभ्यामयं पीतवानासवं
पुट्टराजो हि पुष्टः कविर्गायकः ॥ २ ॥

नैककाव्यकृती राष्ट्रभाषामयीः
मातृभाषामयीः देवभाषामयीः ।
देहदौर्बल्यमध्येऽपि यः सृष्टवान्
तच्छतं काव्यग्रन्थान् लिखेद् बुद्धिमान् ॥ ३ ॥

कोऽपि मत्तोऽल्पतामेति लोके नरः
पुट्टराजो ब्रवीतीदृशं सादरम् ।
यत्पुरा साधितं वामनेनाधुना
नम्रतामेरुणा तत्कृतं साधुना ॥ ४ ॥

येऽपि काणाः क्षितौ जन्मना बाधिता
दुर्बला लोकानिन्दास्पदं प्रापिताः
तेऽधुना यत्कृपापात्रतागर्विताः
पुट्टराजो यतिर्लोकचक्षुर्मतः ॥ ५ ॥

योऽपि भारो महान् सन् पुनर्जीवति
तज्जनः स्वावलम्बः कृतः साधुना ।
तद् विहयान्यदेवोऽस्ति किं पूजनं
राष्ट्रदैवस्य लोकस्तुतेर्भाजनम् ॥ ६ ॥

लौकिकाः केचनैमे प्रशंसाप्रभा-
भूषिता केवलं चान्यथा दूषिता ।
पुट्टराजं पुनःप्राप्य संभावितः
अर्थपूर्णा प्रशस्त्यादयस्ते शुभाः ॥ ७ ॥

कालिदासेन सा विश्रुता जन्मभूः
मध्यदेशस्थिता सर्वलोके स्तुता ।
पुट्टराजाश्रितेयं पुरी पुण्यभूः
कन्नडप्रान्तविख्यातिहेतुर्मता ॥ ८ ॥

ब्रह्मचर्यं यमेष्कग्रगण्यं यतः
श्रीकुमारेशपंचाक्षरानुग्रहात् ।
सेवितं कायवाङ्मानसैः सन्ततं
येन चेतोबलं प्राप्तमन्यादृशम् ॥ ९ ॥

नानृषिः सत्कविर्भूतले जायते
उक्तिरेषा पुराणा नवा स्तूयते ।
पुट्टराजे कवीन्द्रे सदा सार्थका
जङ्गमज्ञानदैवालये साधके ॥ १० ॥

जीयात्सदा भुवनवन्दितकाव्यशक्तेः
प्रज्ञाबलेन विमलीकृतशम्भुभक्तेः ।
श्री पुट्टराजशिवयोगिधुरन्धरस्य
श्रीमल्लिकार्जुनपरङ्किकृता प्रशंसा ॥ १२ ॥

१६ 'रमणस्तवमालिका'

त्यक्तप्राणिदयो निजप्रणयिनः प्रीणन् प्रभाभीरुकः
वित्तप्राप्त्यभिलाषुकोऽविमलधीः क्वाहं हसन् सज्जनान् ।
युक्तप्राणिदयो जगत्प्रणयवान् योगप्रभामण्डितः
तत्त्वज्ञानसुखी क्षितौ विमलधीः क्वासौ शिवाभेदवान् ॥१॥

अद्वैतभावबिशदीकृतमानसोऽसौ
द्वैतप्रभावकलुषीकृतमानसोऽहम् ।
तच्छङ्करं ह्यरुणभूधरवासिनं तं
स्तोतुं कथं जडमतिः प्रभवामि लोके ॥ २ ॥

जीवेशयोरद्वयभावरागः
क्वासौ शिवांशो रमणाख्ययोगी ।
मायामयो जीविगणप्रभेदः
क्वाहं जडात्मा नुतयोगिपादः ॥ ३ ॥

मौनं यस्य वचो भवेदनुदिनं चित्ते विरागः सदा,
भक्तिर्भूतपतौ नु जीविनिवहे पूर्णोदया सा दया ।
कर्मण्यत्र रतस्य तस्य विमलज्ञानानुरागात्पुनः,
जीवन्मुक्तिरिह प्रपन्नकरुणावृत्तिः सदा योगिनः ॥ ४ ॥

योगात्प्राप्तो विमलमनसा जीवता येन मोक्षः
तस्यैवाहं ननु जडमतिः कर्तुकामः प्रशंसाम् ।
बद्धः प्रीत्या विषयरसिकः संकुचन्मानसोऽहं
मुक्तेर्मार्गे चलितुमपि वा
शक्तिमान् हि कथं स्याम् ॥ ५ ॥

१७ अन्नदानीस्वरस्तवः

यस्यान्तरङ्गबलमस्ति विवेकपूर्णं
शुद्धा क्रिया भवति लोकहितप्रवृत्ता ।
लोकोत्तरा भवति तस्य कृतिर्विचित्रा
तज्जन्मना क्षितिरियं हि वभूतिपूर्णा ॥ १ ॥

दारिद्र्यतापविकलः शिवभक्तिशून्यः
सर्वत्र तस्य सततं द्रविणं सुमान्यम् ।
यः शंभुभक्तधुरितिष्ठति निर्मलात्मा
तत्साधयत्यनुदिनं भुवि नो महात्मा ॥ २ ॥

मूकं करोति भुवि काव्यकलाप्रवीणं
पंगुं करोति गिरिलंघनशक्ति पूर्णम्- ।
श्री अन्नदानिचरपुङ्गव दिव्य वृत्ते
आश्चर्यकर्मनिचयो हृतलोकचित्तः ॥ ३ ॥

शम्भोस्तथा परमयोगवतः प्रसादात्
रिक्तस्तरुः फलति पुष्पचयप्रपूर्णः ।
तेनाम्रवृक्षविफलत्वविनाशपूर्वं
तत्साधितं जगति लोकहिताय सर्वम् ॥ ४ ॥

यो वा भवेद्भुवि महान् भवरोगवैद्यः
कायादिरोगहरणेऽपि भवेत्समर्थः ।
पादोदकादि महिमागमावर्णितोऽद्य
श्री अन्नदानि यतिनाऽपि कृतो यथार्थः ॥ ५ ॥

जायापती यदि परस्परतुष्टचित्तौ
ईशानुगरसिकौ चरपादरक्तौ
ताभ्यां सदैव शिवयोगिवरः प्रसन्नः
श्रीअन्नदानिचरितंतदुदाहृतिः स्यात् ॥ ६ ॥

अत्याश्रमे शिवमते सकलाः समाना
जात्यादिभेदगणना न कदापि कार्या
वर्णाधमा विमलभक्तियुताऽपि नारी
श्री अन्नदानिकृपया जगदेकवन्द्या ॥ ७ ॥

भूतानुकंपिशिवयोगिवरप्रसादात्
मोक्षं प्रयाति नरवद्भुवि वानरोऽपि
कोपात्पुनर्यतिवरस्य नरः प्रभावी
दुःखं प्रयाति नितरांबहुधा कुवादी ॥ ८ ॥

यो वोदरार्थमनिशं मनुजः सचिन्तः
विद्याजने कृतमतिर्भवितु च शक्तः
इत्थं प्रसादनिलयान् विरचय्य पूर्वं
विद्यालयादिरचनादृत मानसौऽभूत् ॥ ९ ॥

तेजस्तेजसि वारि वारिणि यथा न्यस्तं व्रजत्येकतां
आत्मश्रीशिवरोगिनः परशिवे यातस्तथा चैकताम् ।
यो वा तत्स्मरणं करोति मनसा वाचाऽपि
निष्ठामयः
तीर्त्वा तापमहोदधिंहि लभते सौख्यामृतं
तन्मयः ॥ १० ॥

१८ कुमारयोगिसेस्तवः

वर्णादिदौर्जन्यसुताडितानां
दुर्भाग्यदारिद्र्यसुपीडितानाम् ।
मूर्तं प्रबोधं सुविचारपूर्णं
वन्दे सदाहं बसवं प्रसन्नम् ॥ १ ॥

वर्णसूतकादिनिष्ठमेव वैदिकं मतं
तद्विरुद्धमेव वीरशैवदर्शनं यतः ।
धर्मराजनीतिसाम्यदवादपुष्टिरेकतः
स्वावलम्बनं पुनश्च वीरशैवमन्यतः ॥ २ ॥

वीरशैवदर्शनं विनाशमार्गवर्तिनं
सांप्रतं कुरीतिदैन्यबाधितं विरोधितम् ।
तीक्ष्णबन्धुवर्गमात्मनो विषादपूरितं
दुःखमोक्षकारणं च तेन तद्विचारितम् ॥ ३ ॥

निर्धनः कुमारयोग्ययं च शैरवेऽभवत्
धर्मबन्धुदैन्यवीक्षणं कृतं स्वयं यतः ।
तद् दरिद्रलोकमोक्षहेतुके च कर्मणि
लीनचित्त आस बालसूर्यवत् तमोलये ॥ ४ ॥

स्थापिता च वीरशैवबोधिका महासभा
योगमन्दिरं ततः शिवादिधर्मसाधनम् ।
लोकजागृतिः कृता दरिद्रसेवया तया
पूर्णचित्तवाक्क्रियामयेन योगिनामुना ॥ ५ ॥

सांस्कृतं वाङ्मयं गानविद्यादिकं
पोषितं योगिना साधवः तोषिताः ।
योगशक्तिः समाजोन्नतेः साधनं
शम्भुलिङ्गार्चनं जङ्गमाराधनम् ॥ ६ ॥

शाम्भवे कीर्तने शिक्षिताः केचन
गानविद्याप्रवीणास्ततः केचन ।
भस्मशुद्धौ पुनःस्थापिताः केचन
येन सर्वे सदोद्योगमग्नाः जनाः ॥ ७ ॥

मूढता गर्हिता तन्द्रिका खण्डिता
धर्मनिष्ठा समाजे पुनर्मण्डिता ।
दीनतोत्सारिता दूरतो सा यतः
वीरशैवाः समस्ताः सदा बोधिताः ॥ ८ ॥



१९ हा हन्त विद्वान् स्वयशोऽवशेषः

(लिङ्गैक्य डा. मल्लेदेवरुमहोदयेभ्यः सस्कृतपद्यपुष्पाञ्जलिः)

भूलोकवासविरतो निजमोक्षलाभ-
रक्तो विहाय सहसा भुवनं प्रयातः ।
एतत्प्रवृत्तिकुलिशाहतिखिन्नचित्तं
हा हन्त हन्त शममेति कुतः सचिन्तम् ॥ १ ॥

विद्यार्जनं द्रविणमात्मतमोविनाशं
वेदान्तमुख्यविषयान् विविधान् विचार्य ।
पाण्डित्यलाभरसिको विबुधाग्रगण्यः
लोकादृतश्च सरसो विरसेऽवकाशे ॥ २ ॥

छात्रोपकारनिरतो विरतः स्वलाभात्
आचारवच्चरवरार्चनचित्तलोभः ।
वित्तार्जने मितमतिः सुकृतैकसक्तः
आत्मोन्नतिं प्रति सदावहितोऽ प्रमत्तः ॥ २ ॥

गान्धीविचारसरणिप्रतिपादकोऽपि
श्री वीरशैवमतसंस्कृतमातसोऽपि ।
मौल्यं हि मानवसमाजहितस्वभावं
प्रत्यादृतः शरणधर्मरतिप्रभावः ॥ ४ ॥

शैवागमप्रकटनाहितचित्तवृत्तिः
वेदान्तशास्त्ररचनाहृततापभीतिः ।
तर्कादिकर्कशमना अपि साधुरेषः
काव्यादिकोमलमतिः सततं सुभाषः ॥ ५ ॥

विद्वज्जगद्भवति दुःखभरातितप्तं
राष्ट्रं विनीतविरहावसरे ह्यतृप्तम् ।
ये वास्य शंसनपरा भुवि मादृशास्ते
हा हन्त हन्त मुषिता विमुखे कृतान्ते ॥ ६ ॥

आरूढवान् शिखरमुन्नतमात्मशक्त्या
आश्चर्यमेति यदवेक्ष्य जनः समोदम् ।
साधुस्वभावजितपण्डितमण्डलोऽयं
कोऽजातशत्रुरधुना भुवि तं विहाय ॥ ७ ॥

यावांश्च पुस्तकगणो रचितः प्रसिद्धो
लेखाश्च शोधविषया लिखिताः प्रबुद्धाः ।
अन्यच्च तेन विदुषा कृतमस्ति कार्यं
तैरेव जीवति गतोऽपि दिवं स आर्यः ॥ ८ ॥

२० विरलो मनीषी

केचित्स्वीयपदाप्तगौरवधनाः सन्तुष्टचित्ता यतः
नास्माकं करणीयमस्ति भुवने चेत्यादि येषां मतिः ।
येषां जीवनसाधनं भुवि भवेत्सम्मानपूर्वं पुनः
राधाकृष्णमहोदयो बहुमतस्तेषां विशिष्टात्मनाम् ॥ १ ॥

यस्याध्यातिनकशिक्षणं बहुश्रुतं विश्वेऽधिकं विश्रुतं
गीतालोचनमस्य लोकविदितं वेदान्तसारायितम् ।
हिन्दूदर्शनगौरव समुचितं येनैव विस्तारितं
तेरेवांग्लमनःस्थिता बहुविधा दुर्भावना त्याजिता ॥ २ ॥

अन्तेवासिधनापहारनिपुणा आचार्यनामांकिताः
तद्धत्तापनिरासशक्तमतयोऽपूर्वाः पुनः शिक्षकाः ।
तेष्वेको विरलेषु लोकविदितो मुख्यो गुरुः सात्त्विकः
यो ह्याचार्यपदं च गौरवपदं प्राप्नोति लोकाधिकम् ॥ ३ ॥

यो वा दर्शनधर्मनीतिपुणश्चाचारवान् संयमी
साधुर्लोकहिते सदा दृढमतिलोकाधिकारक्षमः ।
येदं सुधिया निरूपितमहो देशे प्रसिद्ध्या समं
सोऽभूद् राष्ट्रपतिः प्रजापरिचरो निष्पक्षपातोऽसमः ॥ ४ ॥

तद्देशान्तरचारिभिः सुविदितं यद्राजदूतैः कृतं
अज्ञैर्भारतसंस्कृतेश्च विमलाया आंग्लनेत्रैर्यतः ।
ग्रन्थैः शास्त्रपरिष्कृतैः प्रकटितं वैदुष्यघोषायितैः
सोऽयं भारतसंस्कृतेः प्रतिनिधिश्चचार्यमौलिर्मतः ॥ ५ ॥

२१ मल्लिकार्जुन यशःसुरभिः

शून्यसिंहासने बोधभानूदये
वीरशैवाग्रणीरल्लमो राजते ।
नैकशो योगिराजाश्च पुण्योदये
राजमाना जगद्वन्दिताः सत्कृताः ॥ १ ॥

तेष्वनेकेष्वयं मौलिभूतः कृती
जङ्गमाधीश्वरो लोकसेवाव्रतो ।
धर्मनीतिप्रचारैकमग्नो यतिः
लोकनीतौ पटुर्लिङ्गलीलारतिः ॥ २ ॥

शैशवे शक्रमुख्यैश्चमूनायकः
षण्मुखः शम्भुपुत्रः पुरा पूजितः ।
बाल्यकाले त्यजन् बान्धवानात्मनः
वारणासीं गतो ब्रह्मविद्यारतिः ॥ ३ ॥

तर्कशास्त्रादिकार्कश्यपूर्णः स्थिरः
काव्यसौख्यः कलापोषणेऽग्रेसरः ।
शब्दशास्त्रे च यैदुष्यपूर्णः सुधीः
पण्डितानां धुरीणश्च कल्याणधीः ॥ ४ ॥

बालभानुर्यथा ध्वान्तभेदक्षमः
पूर्णचन्द्रस्तमो हन्ति नैशं यथा ।
बोधचन्द्रश्च संकल्पसूर्यो महान्
कीर्तिमान् शैशवेऽपि प्रभामण्डितः ॥ ५ ॥

कान्नडे सांस्कृते वाङ्मये दर्शने
योगशास्त्रे पुनः सिद्धिमान् तन्मयः ।
सत्क्रियायोगवान् भोगदूरोऽभयः
तस्य वित्तं विशालं सदा संयमात् ॥ ६ ॥

शून्यसिंहासने मेरुसानूपमे
यः स्थितो न च्युतो योगशक्त्याऽसमः ।
वीरशैवप्रतिष्ठाशरण्यः कृती
लोकसंतोषकृत् शम्भुपूजारतिः ॥ ७ ॥

श्रीमठेऽस्मिन् शिवाद्वैतचन्द्रोदये
चन्द्रिकां षट्स्थलाख्यां किरन् तन्मयः ।
लौकिकं पारमार्थं यदप्यद्भुतं
तत्कृतं शम्भुपूजेति संकीर्तितम् ॥ ८ ॥

नानृषिः काव्यकृद् वाक्यमेतज्जगद्-
विश्रुतं वाङ्मयेऽस्य प्रमाणीकृतम् ।
भावभूषासमालिङ्गनं वाङ्मनो-
सङ्ममोऽ लौकिकः शारदाराधने ॥ ९ ॥

ग्रन्थराशिः प्रकाशीकृता साधुना
छात्रवर्गः कृती शिक्षणप्रेमिणा ।
अन्नदानादि संमानितः प्रीणितः
ब्रह्मविद्यापवित्रीकृतोः बोधितः ॥ १० ॥

लोकमौदार्यपूर्णः स्वयं प्रीणयन्
विश्वमेवाखिलं मन्दिरं यत्कृते ।
लौकिकं पारमार्थं समं बोधयन्
योगिराट् जीवतु क्ष्मातलेऽ नारतम् ॥ ११ ॥

यः क्रियावान् स एव क्षितौ पण्डितः
यः सदाचारवान् तेन भूर्मण्डिता ।
साधुभिः स्तूयते यः सदा स्वेच्छया
येन वा धूर्जटिः प्रीणितः पूजया ॥ १२ ॥

लोकोपकारनिपुणं कृपणं स्वकीर्ति-
विस्तारकर्मणि कृतार्थमनालसं तम् ।
लोकैकवन्द्यमधुना भवरोगवैद्यं
श्रीमल्लिकार्जुन परङ्गिरहं नतोऽस्मि ॥ १३ ॥



२२ महान्तेशसुप्रभातम्

पुत्रीकृतोऽपि जगदुद्धरणप्रसन्नः
गौर्यम्बया भुवनवन्दितपादपद्म ।
त्यक्तात्मबन्धुनिचय! प्रतिजन्तुबन्धो!
श्रीमन्महान्तयतिराट्! तव सुप्रभातम् ॥ १ ॥

माता सखीजनयुता भवतः प्रतीक्षां
कुर्वन्त्यथोत्सुकमतिर्निभृतं स्थितासौ ।
भक्तैः समं विविधतापमयैश्च मुग्धैः
उन्मीलयाक्षियुगलं तव सुप्रभातम् ॥ २ ॥

स त्वं गिरेः विजनगह्वरयोगनिद्रः
लिङ्गाङ्गसङ्गनिजचित्तसुखानुभूतिः ।
रक्तो विरक्तमभयं भवभीतचित्तः
भानु प्रतीक्षति बहिस्तव सुप्रभातम् ॥ ३ ॥

माता शिवः परशिवो जनकः मदीय
इत्थं विचिन्त्य भवनं त्यजतीति चित्रम् ।
यस्मात् समस्त भुवनं भवनं त्वदीयं
श्रीमन्महान्तयतिराट् ! तव सुप्रभातम् ॥ ४ ॥

वैश्वातरो हिमकरः सविता त्वदीय-
तेजोंशमात्रबलतो विकसत्प्रकाशः ।
कैलासवासविरतो भुवनेऽवतीर्णः
श्रीमन्महान्तयतिराट् ! तव सुप्रभातम् ॥ ५ ॥

पूर्वाम्मया त्वदभिषेकविधिं विचिन्त्य
स्वच्छं जलं कमलकान्ति प्रकाशरूपम् ।
आनीयते विमलधीयुतया सुताय
श्रीमन्महान्तयतिराट् ! तव सुप्रभातम् ॥ ६ ॥

भिक्षाटनं परिमितं यदि वा करोषि
विद्यार्जनाय नगरे करडीशशुद्धे ।
नार्यस्त्वदागमनलालसया विनिद्राः
श्रीमन्महान्तयतिराट् ! तव सुप्रभातम् ॥ ७ ॥

श्रीचित्रगी मठमलंकुर वत्स योगिन्
इत्थं विनम्रमतिना करडीशपृष्टः ।
वैराग्यमूर्तिरपि लोकहिताय पीठ-
मारूढवान् यतिपते तव सुप्रभातम् ॥ ८ ॥

पट्टाभिषेकसकलोत्सवमीक्षितुं ते
तिष्ठन्ति भक्तनिवहाः बहुशः सश्रद्धम् ।
त्वद्दर्शनोत्सुकधिया जयघोषशुद्धाः
श्रीमन्महान्तयतिराट् ! तव सुप्रभातम् ॥ ९ ॥

श्रीमज्जनं शिवनुतिं स्वयमेव पाकं
लिंगार्चनं वचनशास्त्रविलोकनं च ।
कर्तुं तथा जनहितं भव बाह्यबोधः
श्रीमन्महान्तयतिराट् तव सुप्रभातम् ॥ १० ॥

दीर्घं तपस्तपसि यच्छिवयोगसिद्ध
भूलोकसौख्यमपि चिन्तयसे हृदि त्वम् ।
कार्पण्यदोषभरितः पुरतो स्थितोऽयं
लोको भवत्स्तुतिपरस्तव सुप्रभातम् ॥ ११ ॥

कूपस्य निर्मितिविधावनिवार्यो भावः
यावद्भवस्यनुतटं शिवयोगमग्नः ।
सत्याग्रहात् तव पुनः शिवशापभीता
गङ्गा स्पुटत्यभयदा तव सुप्रभातम् ॥ १२ ॥

नास्मीति ना वदति चाल्पशिलातलार्थं
वाणी "तथा भवतु" ते वदनात् प्रयाता ।
पत्नी तदातदभयं भवतः प्रसन्नात्
प्राप्तुं पुरःस्तुतिपरा भव सानुकम्पः ॥ १३ ॥

पूर्वाशयाऽरुण समुद्भव काल एषः
ते खेचरा मधुरवाक्कृतलोकहर्षाः ।
मन्दं मरुच्चरति पुष्पसुमन्धवाहः
श्रीमन्महान्तयतिराट् तव सुप्रभातम् ॥ १४ ॥

घण्टानिनाद निचयः श्रवणप्रसादः
भेरीमृदङ्ग मुरजध्वनिरेति कर्णम् ।
देवालये शिवनुतिं भवतोऽपि कुर्वन्
संघः सतामनुदिनं भजते भवन्तम् ॥ १५ ॥

सूर्यातपे सुखद ! भोजनसंप्रवृत्ते
स्वच्छांगणे न भविता ननु पीडितांगः ।
इत्थं विचिन्त्य घनमातनुते सुछत्रं
येनावृतो दिनमणिः शिशिरत्वमेति ॥ १६ ॥

भानुः प्रसन्नकिरणोऽपि तमोपहन्ता
लोकात्मसंचिततमो न निहन्तुमीशः ।
तस्मात्त्वमात्मकरुणामयदृष्टिपाताद्
भक्तान् पवित्रमनसः कुरु सुप्रभाते ॥ १७ ॥

रोगादिदोषविगलच्छुभचिन्तनो यो
लोको विनम्रवदनः सदनादिहीनः ।
त्वामेकबन्धुमिति यत् शरणं प्रयाति
योगीन्द्र रक्ष सकलं तव सुप्रभातम् ॥ १८ ॥

हालाहलं गिरिसुतारमणः प्रसन्नः
पीत्वाभवत् क्षितितलावनहेतुभूतः ।
योगिन् ! विषान्नपचनं कुरुषे सलीलं
उत्तिष्ठ पाहि भुवनं, तव सुप्रभातम् ॥ १९ ॥

नक्तं तपश्चरणतो हृतपापराशिः
तारावली ह्युषसि मण्डित पुष्पराशिः।
भूत्वा च ते निपतिता पदयोः प्रसीद
श्रीमन्महान्तयतिराट्! तव सुप्रभातम् ॥ २० ॥

अन्यो ह्ययं मनुजसंकुल इत्यमुष्य
चेतोविचारसरणिर्न कदापि जाता।
ये वा सभक्ति करुणाकर! वन्दनं ते
कुर्वन्ति सन्ति तव ते, तव सुप्रभातम् ॥ २१ ॥

यो वा भवत्यनुदिनं जनकार्यपाकः
शम्भोर्निवेद्य सततं सफलं तदेतत्।
भोक्तव्यमात्मरतये रतिनाथशत्रोः
उत्तिष्ठ शिक्षितुमिदं तव सुप्रभातम् ॥ २२ ॥

कृष्णा पुराऽसुररिपोः कृपया कदाचित्
अभ्यागतावलिमथाक्षयपात्रहस्ता।
आराधितां कृतवतीति कविर्ब्रवीति
संतर्पणे भवसि नित्यकृतादरस्त्वम् ॥ २३ ॥

एकादशं यदपि ते द्विगुणान्यहानि
नीतानि निर्मलधिया ह्यशनं विनैव।
शम्भुः पुरस्तव मुदा समुपागतोऽयं
उन्मीयलाक्षियुगलं तव सुप्रभातम् ॥ २४ ॥

वीक्ष्यात्मबन्धुनिचयो निभृतं समाधौ
त्वां शाश्वते विरतपुङ्गव निर्विकल्पे ।
अद्यापि भक्तिनतमौलिरतोऽ स्त्यपालः
तद्रक्षणाय भवतात् तव सुप्रभातम् ॥ २५ ॥

यः पठेत् निष्ठया तुष्टः
सुप्रभातमिदं यतेः ।
चित्रगी चित्कलापूर्णो
महान्तेशोऽवतात् नतम् ॥ २६ ॥



२३ रड्डीकुलदेवता

हेमरड्डीकुलालंकृतिः पावना
शम्भुपादार्चने सापि यद् भावना ।
जंगमातिथ्यदक्षा पतेर्जीवितं
लोकवन्द्याभवत् मल्लमाम्बा यतः ॥ १ ॥

भूतलेऽनेकशोऽस्ति प्रभाभूषितं
रत्नजातं सुगुप्तं सदोपेक्षितम् ।
रत्नमेकं पतिच्छद्मवेषं जगद्-
वन्दितं या चकारात्मतेजोबलात् ॥ २ ॥

वेमनार्यः पतेः दुर्णयः सोदरः
पुत्रवत्पालितः पापसंक्षालितः ।
यत्कृपापात्रतामेत्य योगीश्वरो
भोगदूरः स्वयं लोकवन्द्योऽ भवत् ॥ ३ ॥

सर्वलोकोपकारे रतापि प्रसूः
स्वीयबन्धूनियं सर्वदा कांक्षते ।
धान्यपूर्णान् च धन्यान् दरिद्रेतरान्
येन तुष्टा वयं भूतले गर्विताः ॥ ४ ॥

मातरद्य क्षितौ दीनहीना वयं
विस्मृता त्वं यतश्चात्मनाशे रताः ।
रक्ष तान्ते सुतान् ताडितान् सर्वतः
आपदा पीडितो मातरं संस्मरेत् ॥ ५ ॥

वैराग्यमूर्तिमतुलां शिवभक्तिपूतां
संसारकूपपतितामपि तापदूराम् ।
श्रीमल्लिकार्जुनकृपाजित सर्वलोकां
मल्लम्ममातरमहं मनसा स्मरामि ॥ ६ ॥

२४ रेणुकस्तवमञ्जरी

भूतले धर्महानिर्यदा जायते
ईश्वरस्यावतारस्तदा जायते ।
किन्तु धर्मच्युतौ धूर्जटेराज्ञया
तद्गणाधीश्वराः धर्मरक्षारताः ॥ १ ॥

वीरशैवक्षति धर्महीनोन्नतिं
वीक्ष्य तद्रक्षणे दत्तचित्तोऽभयः ।
रेणुकः शंकरस्याज्ञया चिन्मयः
शम्भुलिङ्गोद्भवः सर्वलोकादृतः ॥ २ ॥

मातृगर्भे यतो लिङ्गदीक्षायुताः
वीरशैवाः समस्ताश्च लिङ्गोद्भवाः ।
तत्त्वमेतद् धरायां पुनः स्थापयन्
लिङ्गगर्भोद्भवः शम्भुपूजारतः ॥ ३ ॥

तच्छिवज्ञानपात्रं निरीक्ष्याद्भुतं
कुम्भयोनिं मुनीन्द्रं दयापूरितः ।
यः स्वयंशिष्यहृत्तापनाशे रतः
प्राप्तवान् सर्वशिष्योत्तमं पावनम् ॥ ४ ॥

वेदवेदान्तवाक्यैः पुराणादिभि-
रागमैः शम्भुवक्त्रागतैः पावनैः ।
वीरशैवाख्यतन्त्रोत्तमं भूतले
ख्यापयामास शिष्योपदेशच्छलात् ॥ ५ ॥

अर्जुनाज्ञान दूरी क्रयासाधनं
वासुदेवोक्तगीतामृतं पावनम् ।
सर्वलोकोपकारक्षमं यादृशं
रेणुकाचार्यगीतामृतं तादृशम् ॥ ६ ॥

यः शिवाद्वैतमन्यादृशं षट्स्थला-
न्तर्गतं तन्त्रमेकोत्तरं तच्छतम् ।
बोधयित्वा कृतार्थं मुनिं चाकरोत्
लोककल्याणचित्तः कृतार्थोऽ भवत् ॥ ७ ॥

रावणस्यानुजः शम्भुभक्ताग्रणीः
येन चागत्य लंकेश्वरः पावितः ।
दीन लोकोपकारे रतो रेणुकः
कस्य न स्यात्प्रशंसास्पदं भूतले ॥ ८ ॥

लिङ्गलीनः शिवाद्वैतरक्तो जन
आत्मदेहावसाने सुभक्तो भवेत् ।
एतदादर्शमात्मप्रमाणीकृतं
दर्शयन् लिङ्गलीनोऽन्ततः वै कृती ॥ ९ ॥

यस्य दृक्पातधन्याः क्षितौ जन्तवः
पादरेणुप्रभावात्पवित्रीकृताः ।
यद्वचोवारिधौतास्ततो मानवाः
श्रीगणाधीश्वरं रेणुकं तं भजे ॥ १० ॥

डॉ. परड्डी मल्लिकार्जुन संस्कृत कृतयः

मौलिकग्रन्थाः

1) संस्कृत काव्यमालिका (1977)
2) गंगाधर शतकम् (1992)
3) संस्कृत काव्य मन्दाकिनी (1993)

अनुवादग्रन्थाः

1) कबीरदास शतकम् (1988)
(केन्द्र साहित्य अकाडमी अनुवाद प्रशस्ति पुरस्कृतम्)
2) बसवेश्वर शतकम् (1989)
3) अक्कमहादेवी शतकम् (1992)

संपादित ग्रन्थाः

1) मल्हण स्तोत्रम् (1982)
2) चित्रगी विजय महान्तेश चंपू (1982)
3) पुट्टराज कवि विरचित कर्तुजगद्गुरु सिद्धेश्वर चम्पू (1992)